Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ-चतुर्थीकर्म:-

चतुर्थ्यामपरात्रेऽन्तरग्नौ मुपसमाधाय दक्षिणतोब्राह्मणमुपवेश्यो-
-त्तरत × — अथवधूप्रवेशद्वारमातृणां पूजनं —

तत्र प्रथमं संकल्प:- अद्येह अमुकशर्मा सवधूकोऽहं करिष्यमाण स्वगृहप्रवेशकर्मण: पूर्वाङ्गत्वेन द्वारमातृणां पूजनं करिष्ये इति संकल्प्य कुमारी धनदा-नन्दा विपुला मंगला-चला पद्मा-चैव समाख्याता: सप्तैता द्वारमातर:- ॐ कुमार्यै नम: ॐ धनदायै नम: ॐ नन्दायै नम: ॐ विपुलायै नम: ॐ मंगलायै नम: ॐ अचलायै नम: ॐ पद्मायै नम:। इति ध्यानादिनीराजनान्तं सम्पूज्य लग्नदानं कुर्यात् अद्येह अमुकशर्मा स्त्री सपत्नीकोऽहं मम गृहप्रवेश लग्नाद्यत्रकुत्रस्थान स्थितानांसादित्यादिनवग्रहाणां शुभानां शुभ [illegible] प्राप्तये दुष्टानां दुष्टफलोपशांति पूर्वकं शुभ फलप्राप्त्यर्थं [illegible] मुख्यमयंलोक ब्राह्मणाय दातुमहमुत्सृजे तत्सन्नमम [illegible] स्तारणम्। वहिश्चतुष्क।

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

...पू स्वासन समुपवेश्य स्व... विश्य
...चम्य प्राणानायम्य उच्चलं नधा गणपत्यादीना...
...यादि देशकालौ संकीर्त्य अमुकशर्मा सवधूको ऽहं मम...स्याः
वध्वाः सोमगन्धर्वाग्न्युपभुक्तिदोष परिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं
विवाहाङ्गभूतं चतुर्थीकर्म करिष्ये तन्निर्विघ्नतायाकायसिद्धये आदौ
गणपत्यादीनां पूजनं करिष्ये इति संकल्प्य । होमवेदीं सम्पाद्य दर्शपूर्णमासाङ्गं
आरभेत तत्र क्रमः- त्रिभिः कुशैरस्तपरिमितां चतुरस्रां भूमिं परिसमुह्य
तान् कुशानैशान्यां परित्यज्य गोमयोदकेनोल्लिप्य स्फ्येन स्रुवमूलेन
वा ~~उदगुत्तरक्रमेण दक्षिणानामिकाङ्गुष्ठाभ्यां~~ तिस्रो रेखा विलिख्य
उल्लेख क्रमेण दक्षिणानामिकाङ्गुष्ठाभ्यां रेखाभ्यो मृदमुद्धृत्य
जलेनाभ्युक्ष्य तत्र कांस्यपात्रेस्थमग्निं तूष्णीं स्वाभिमुखमुपस-
माधाय ब्रह्मवरणं कुर्यात्- अद्येह अमुकशर्माहं करिष्यमाण
चतुर्थीकर्माङ्गहोमकर्मणि कृताकृतादि वेक्षणादि ब्रह्मकर्म कर्तुं
ब्रह्मणः पूजनपूर्वकं वरणं करिष्ये इति संकल्प्य । ॐ ब्रह्मजज्ञानं
प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः सबुध्न्या उपमा अस्य
विष्ठाः सतश्च योनिमसतश्च विवः ॥ इति गन्धादिभिः सम्पूज्य

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वरणसामग्रीं करे कृत्वा- रभिर्गन्धाक्षतपुष्पमालाचन्दन
ताम्बूलवासोभिः करिष्यमाण-चतुर्थीकर्मङ्गिहोमकर्मणिकृता-
कृतावेक्षणादि ब्रह्म कर्म कर्तुं ब्रह्मत्वेन त्वामहं वृणे- इति
ततः यथा-चतुर्मुखो ब्रह्मा सर्ववेदविदां वरः। तथा त्वं मम
यज्ञे ऽस्मिन् ब्रह्मा भव द्विजोत्तमः॥ इति॥ ततोऽग्नेर्दक्षिणतः
शुद्धमासनं दत्वा तदुपरि प्राग्ग्रान् कुशानास्तीर्य ब्रह्माणं
अग्निप्रदक्षिण क्रमेणानीय अस्मिन् कर्मणि त्वं मे ब्रह्मा भवेति
ॐ भवानीति ब्राह्मणेनोक्ते तत्र कल्पितासने ब्रह्माणमुदङ्मुख-
मुपवेशयेत्। ततः पृथूदकपात्रमग्नेरुत्तरतः प्रतिष्ठाप्य
प्रणितापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य
शो मुरवमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात्।
रणम्। वर्हिषश्चतुर्थभागमादाय आग्नेयादीशानान्तम्

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्नेपर्यन्तम्, नैर्ऋत्याद्वायव्यान्तम्, अग्नितः प्रणीता
पयन्तम्। परिस्तीर्य। ततो ऽग्नेरुत्तरतः पश्चिमादिशि पवित्र
च्छेदनार्थं कुशत्रयम्, पवित्रकरणार्थं साग्रमनन्तर्गर्भंकुश-
-पत्रद्वयं, प्रोक्षणीपात्रं वारणं द्वादशाङ्गुलदीर्घं करतलमितखातं
पद्मपत्राकृति वा, आज्यस्थाली ताम्रजसी मृण्मयी वा द्वादशां
ङ्गुलविशाला प्रादेशोच्चा -चरुस्थाली, सम्मार्जनकुशास्त्रयः,
वेणीरूपोपयमनकुशास्त्रयोदश, समिधस्तिस्रः पालाश्यः
अन्या वा प्रादेशमात्र्यः, स्रुवः, आज्यं गव्यं, तण्डुलपूर्णं
पात्रं षट्पञ्चाशदुत्तरवरमुष्टिशतद्वयावच्छिन्नम् एतानि
पवित्रच्छेदनकुशानां पूर्व-२ दिशि क्रमेणासादनीयम्। ततः
ततः पवित्रच्छेदनकुशैः प्रादेशमिते पवित्रे छित्वा सपवित्र

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दक्षिण करेण प्रणितोदकं त्रिः प्रोक्षणीपात्रे निधाय दक्षिणाना-
-मिकाङ्गुष्ठाभ्यांमुत्तराग्रे पवित्रे गृहीत्वा दक्षिण करेण
प्रोक्षणीपात्रमुत्थाप्य सव्ये कृत्वा पवित्राभ्यां प्रोक्षणी
जलं त्रिरुत्क्षिप्य प्रणीतोदकेन प्रोक्षणी प्रोक्षणं विधाय
प्रोक्षणी जलेनासादित वस्तुसेचनं कृत्वाग्नेः प्रणितयोः
मध्ये प्रोक्षणीपात्रं निदध्यात् । ततः आज्यस्थाल्यामाज्यं
निर्वाप्य तदाज्यमग्नावधिश्रित्य स्थालीपाकायसार-
-तण्डुलानादाय त्रिः प्रक्षाल्य चरुस्थाल्यां निक्षिप्य चरुं
श्रपयित्वा ततो ज्वलत्तृणादिना प्रदक्षिणक्रमेण इविर्विष्-
-णा बर्हिषि तत् प्रक्षिपेत् । ततः दक्षिणहस्तेन स्रुवमा-
-दाय चमसोभुवमग्नौ प्रतप्य सव्ये पाणा कृत्वा सम्मार्जन

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पर्यन्तमुलादारभ्यान्तरतोऽग्रपर्यन्तम्, सम्भार्जनकुशमूलै-
रग्रादारभ्याध्वस्तान्मूलपर्यन्तं सम्भार्ज्य तान् कुशान् अग्नौ
क्षिपेत्। ततः प्रणितोदकेन स्रुवमभ्युक्ष्य पुनः पूर्ववत् प्रतप्य
स्रुवं दक्षिणतः कुशोपरि निदध्यात् ततः आज्यं चरुं चाग्ने
रुत्तरतो निधायोत्तरोत्तरतः स्थापयित्वा पवित्राभ्यामाज्यमुत्पूय
अवेक्ष्य सत्यपद्रव्ये तान्निरस्य पुनः पवित्राभ्यां प्रोक्षणी
उत्पूय तास्वेव पवित्रे निदध्यात्। तत्र उपयमनकुशान्
दक्षिणपाणिनादाय सव्ये कृत्वा तिष्ठन् प्रजापतिं मनसा
ध्यात्वा घृताक्तास्तिस्रः समिधस्तूष्णीमग्नौ प्रक्षिपेत्
ततः उपविश्य सपवित्र प्रोक्षिणी जलेन प्रदक्षिणमग्निं पर्युक्ष्य
पवित्रे प्रोक्षिणीपात्रे निदध्यात्। ततः द्रव्यत्याग संकल्पः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अद्येह सवधूकोऽहं ममास्याः वध्वाः सोमगन्धर्वाद्युपभुक्तिदोष
परिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं करिष्यमाण-चतुर्थीहोम
कर्मणि प्रजापत्यादिदेवानाज्यादिना यक्ष्ये इति संकल्प्य ।
ॐ सतंते इति भूर्भवस्वः शिखिनामाग्ने इहागच्छेह इतिष्ठेह
सुप्रतिष्ठितो वरदो भवेत् शिखिनामाग्निं प्रतिष्ठाप्य तत्
ध्यानम् - अग्निं प्रज्वलितं वन्दे जातवेदसं हुताशनम् ।
सुवर्णवर्णमनघमनन्तं विश्वतोमुखम् ॥ सर्वतः पाणिपादश्च
सर्वतोऽक्षिशिरोमुखः । विश्वरूपो महान् अग्निः प्रणीतः सर्व
कर्मसु ॥ ॐ चत्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्तहस्तासो
अस्य त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां
श ॥ ॐ शिखिनामाग्नेय नमः इति गन्धादिभिरग्निं

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

[illegible] सप्तजिह्वापूजनं कृत्वा पातितदक्षिण-जानुर्ब्रह्मणा-
प्रेक्ष्य: समिद्धृतमेऽग्नौ आज्याद्याहुतीर्जुहुयात्। तत्राधारादा-
रभ्याहुति-चतुष्टये तत्तदाहुत्यनन्तरं स्रुवावस्थितघृतशेषस्य
प्रोक्षणीपात्रे प्रक्षेपं कुर्यात्। प्रजापत्यादि-चतुर्णां मन्त्राणां
प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो मन्त्रात्मा देवता आज्यहोमे
विनियोगः। ॐ प्रजापतये स्वाहा। इदं प्रजापतये॥ इति
मनसा प्रजापतिं ध्यात्वा ॐ इन्द्राय स्वाहा इदमिन्द्राय
ॐ अग्नये स्वाहा इदमग्नये। ॐ सोमाय स्वाहा इदं
सोमाय। इत्याज्यभागौ जुहुयात्। ततोऽन्वारम्भं विना
पञ्चाज्याहुतीर्जुहुयात्। प्रत्याहुत्यनन्तरं स्रुवपात्रे संस्रव
प्रक्षेपः। अग्ने प्रायश्चित्ते इत्यादिपञ्चानां मन्त्राणां वरमेष्ठी

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्ता देवताः चतुर्धाकिर्मोङ्गाज्य
होमे विनियोगः। ॐ अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्ति
रसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै पतिघ्नी
तनूस्तामस्यै नाशय स्वाहा॥ इदमग्नये॥ ॐ वायो प्राय-
श्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम
उपधावामि यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा।
इदं वायवे॥ ॐ सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि
ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै पशुघ्नी तनू-
स्तामस्यै नाशय स्वाहा॥ इदं सूर्याय॥ ॐ चन्द्र प्रायश्चित्ते
त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम
वामि याऽस्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्द्राय ॥ ॐ गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै यशो घ्नी तनूस्ता मस्यै नाशय स्वाहा ॥ इदं गन्धर्वाय ॥ ततः चरुमाज्येनाभि घार्य स्रुवेणादाय मनसा प्रजापतिं ध्यात्वा जुहुयात् ॐ प्रजापतये स्वाहा इदं प्रजापतये प्रोक्षणीपात्रे संस्रवप्रक्षेपः ततः आज्यं चरुं च गृहीत्वा ब्रह्मणान्वारब्धः महाव्याहृति होमात् पूर्वं स्विष्टकृद्धोमं कुर्यात् । ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते ॥ उदपात्रे संस्रव प्रक्षेपः । ततो ब्रह्मणान्वारब्धः महाव्याहृत्यादिप्राजापत्यान्ता नवाज्याहुतीर्जुहुयात् । तत्तदाहुत्यनन्तरं हुतशेष घृतस्य प्रोक्षणीपात्रे प्रक्षेपः । महाव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्याः देवताः महाव्याहृति होमे विनियोगः ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ भूः स्वाहा। इदमग्नये। ॐ भुवः स्वाहा। इदं वायवे। ॐ स्वः स्वाहा। इदं सूर्याय। ॐ त्वन्नो ऽग्ने इति वामदेव ऋषिः त्रिष्टुप् छन्दः अग्निवरुणौ देवते प्रायश्चित्त होमे विनियोगः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection